स्कन्दमाता हैमवती वरा त्रिपुरमार्दिनी ।
कृपाशीला वेदवेद्या वरदा सर्वमङ्गळा ॥

Colophon:

इति श्रीत्रिपुरसुन्दर्यष्टोत्तरशतदिव्यनामस्तोत्रं सम्पूर्णम् ॥

No. 8851. उमाष्टोत्तरशतनामस्तोत्रम्.
UMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 8819.

Complete.

Similar to the above.

Beginning:

उमा संमोहनी गौरी सौन्दरी भुवनेश्वरी ।
एकाक्षरी महामाया एकाङ्गी एकनायकी ॥
एकरूपा महारूपा स्थूलसूक्ष्मपरायणी ।
बिन्दुरूपेश्वरार्धाङ्गी संग्रामजन(य)नायिका ॥

End:

कालोत्तरा षडाधारा सूक्ष्माङ्गी प्राणधारिणी ।
वज्रशक्तिप्रहरणा शरणागतरक्षणा ॥
अष्टोत्तरशतं देव्यास्त्रिसन्ध्यं यः पठेन्नरः ।
सर्वाभीष्टमवाप्नोति सर्वरोगाविवार्जितः ॥

No. **8852.** उमाष्टोत्तरशतनामावलिः.
UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 85*b* of the MS. described under No. 1500, wherein this has been mentioned as Dēvyaṣṭōttaraśatanāmāvali.

Complete.

This is in the form of a Nāmāvali and contains one hundred and eight names in reference to Pārvatī.

Beginning:

उमायै नमः । संमोहिन्यै नमः । देव्यै नमः । सौ(सु)न्दर्यै नमः । भुवनेश्वर्यै नमः । एकाक्षर्यै नमः । महामन्त्र्यै नमः । एकाङ्ग्यै नमः । एकनायक्यै नमः । एकरूप्यै (पायै) नमः । महारूप्यै (पायै) नमः । स्थूलसूक्ष्मपरायण्यै नमः ।

End:

त्रैलोक्यजनन्यै नमः । भक्तप्रियायै नमः । महागौर्यै नमः । हरिब्रह्मात्मकारिण्यै नमः ।

एवं चाष्टशतं नाम स्तोत्रमीश्वरभाषितम् ।
भक्त्या यः पठते नित्यं दरिद्रो नास्ति निश्चयः ॥
एककालं द्विकालं वा त्रिकालं वा पठेन्नरः ।
भुक्तिमुक्तिकरं चैव सर्वसिद्धिकरं पदम् ॥
भक्तितः पठते नित्यं शिवसायुज्यमाप्नुयात् ।

Colophon:

इति देव्यष्टोत्तरशतनाम संपूर्णम् ॥

No. **8853.** उमाष्टोत्तरशतनामावलिः.
UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 8819.

Complete.

Same as the above

See under the previous number for the beginning.

End:

कालोत्तरायै नमः। षडाधारायै नमः। सूक्ष्माङ्ग्यै नमः। प्राण-धारिण्यै नमः। वज्रशक्तिप्रहरणायै नमः। शरणागतरक्षणायै नमः॥

अष्टोत्तरशतं देव्यास्त्रिसन्ध्यं यः पठेन्नरः।
सर्वाभीष्टमवाप्नोति सर्वरोगविवर्जितः॥

Colophon:

देव्यष्टोत्तरं संपूर्णम्॥

No. **8854.** उमाष्टोत्तरशतनामावलिः.

UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under No. 5204, wherein this has been shown as Dēvyaṣṭōttaraśatanāmāvali among the other works.

Complete.

Same as the above, but without colophon.

No. **8855.** उमाष्टोत्तरशतनामावलिः.

UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 31*a* of the MS. described under No. 8848.

Complete.

Similar to the above.

See under number 8852 for the beginning.

End:

हृल्लेखापरमेश्वर्यै नमः। माहेश्वर्यै नमः। महादेव्यै नमः। त्रैलो-क्यत्राणजनन्यै नमः। शैलनायिकायै नमः॥

No. 8856. उमाष्टोत्तरशतनामावलिः.
UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 158*a* of the MS. described under No. 29, wherein this has been shown as Dēvyaṣṭōttaraśatanāmāvali among the other works.

Complete.

Similar to the above.

See under number 8852 for the beginning.

End :

सूक्ष्माङ्गिन्यै नमः। प्राणाधारिण्यै नमः। वज्रशक्तिधरायै नमः। शरणागतवत्सलायै नमः। त्रिपुरसुन्दर्यै नमः ॥

Colophon :

देव्यष्टोत्तरशतं संपूर्णम् ॥

No. 8857. उमाष्टोत्तरशतनामावलिः.
UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 4. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 4*a*. The other works herein are Subrahmaṇyāṣṭōttaraśatanāmāvali 1*a*, Śivāṣṭōttaraśatanāmāvali 2*b*, Lalitāsahasranāmāvali 6*a*, Triśatīnāmāvali 25*a*.

It is written in the MS. that it was transcribed by one Subbarāyan and was being used by Rāmaliṅgam of Brahmapuri. The MS. further bears the date Monday, the 25th of Aippaśi in the year Pramāti.

Complete.

Similar to the above.

See under number 8852 for the beginning

End :

बलविकरण्यै नमः। बलप्रमथन्यै नमः। सर्वभूतदमन्यै नमः। मरकताम्बायै नमः। श्रीकामाक्षिदेव्यै नमः। श्रीविशालाक्षिदेव्यै नमः ॥

Colophon:

अष्टोत्तरशतनामपूजा ॥

No. 8858. उमाष्टोत्तरशतनामावलिः.

UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 17 on a page.

Begins on fol. 73*b* of the MS. described under No. 3846

Complete.

Similar to the above.

Beginning:

रजताचलशृङ्गाग्रगृहस्थायै नमो नमः ।
हिमाचलमहावंशपावनायै नमो नमः ॥
शङ्करार्धशरीरिण्यै पावनायै नमो नमः ।
लसन्मरकतस्वच्छाविग्रहायै नमो नमः ॥

End:

नित्ययौवनमाङ्गल्यमङ्गलायै नमो नमः ।
महादेवसमायुक्तमहादेव्यै नमो नमः ॥

Colophon:

उमाष्टोत्तरशतनामावलिस्समाप्ता ॥

इदं गिरीशगिरिजानाम(म्रा)मष्टोत्तरं शतम् ।
व्यासेन कथितं स्तोत्रं सर्वरोगानिवारणम् ॥
स्तोत्रं श्रीकण्ठदेवस्य भवान्याः पठते स्वयम् ।
स नरो महदैश्वर्यं लभते वाञ्छितं फलम् ॥

No. 8859. उमाष्टोत्तरशतनामावलिः.

UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol 51*a*. The other works herein are Rāmasahasranāmāvali 1*a*, Viṣṇusahasranāmāvali 13*b*, Śivasahasranāmāvali 27*b*,

Śivāṣṭōttaraśatanāmāvali 43*b*, Rāmāṣṭōttaraśatanāmāvali 46*a*, Sītāṣṭōttaraśatanāmāvali 48*b*, Kṛṣṇāṣṭōttaraśatanāmāvali 55*b*.

Complete.

Same as the above.

Colophon:

इदं गिरीशगिरिजानामाष्टोत्तरं सम्पूर्णम् ॥
व्यासेन कथितं स्तोत्रं सर्वरोगनिवारणम् ।
स्तोत्रं श्रीकण्ठदेवस्य भवान्याः पठतेऽन्वहम् ॥

No. 8860. उमाष्टोत्तरशतनामावलिः.

UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 83*a* of the MS. described under No. 7758, wherein this has been mentioned as Pārvatyaṣṭōttaraśatanāmāvali among the other works.

Complete.

Similar to the above.

Beginning:

स्कन्द उवाच—
भगवन् श्रोतुमिच्छामि रहस्यं पार्वतीपते ।
सर्वसिद्धिकरं नृणामुपायं करुणानिधे ॥
वक्तुमर्हसि देवेश सङ्क्षेपाच्चन्द्रशेखर ।
ईश्वर उवाच—
शृणु षण्मुख सर्वेश सर्वसिद्धिकरं परम् ॥
देव्याः प्रीतिकरं चैव मम प्रीतिकरं सदा ।
संक्षिप्य संप्रवक्ष्यामि सर्वशास्त्रार्थसङ्ग्रहम् ॥
ईश्वर उवाच—

उमायै नमः । माहेश्वर्यै नमः । काल्यै नमः । गिरिजायै (नमः) । शाङ्कर्यै न(मः) । चण्डिकायै (नमः) । गौर्यै न(मः) ।

End :

कृप(ा)शीलायै । वेद्यायै । वरदायै न(मः) । सर्वमङ्गलायै । श्रीपार्वत्यै नमः । अष्टोत्तरशतपुष्पाणि समर्पयामि ॥

No. 8861. देव्यष्टोत्तरशतनामस्तोत्रम्.

DĒVYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 23*b* of the MS. described under No. 5938, wherein this has been mentioned as Pārvatyaṣṭōttaraśatanāmastōtra in the list of other works

Complete.

Similar to the above.

Beginning :

स्कन्द उवाच—

अथातः संप्रवक्ष्यामि रहस्यं पार्वतीपते ।
सर्वसिद्धिकरं नृणामुपायं करुणानिधे ॥
वक्तुमर्हसि देवेश संक्षेपाच्चन्द्रशेखर ।

ईश्वर उवाच—

शृणु षण्मुख देवेश सर्वसिद्धिकरं परम् ।
स्तोत्रं वक्ष्यामि पार्वत्या भुक्तिमुक्तिप्रदायकम् ॥
देव्याः प्रीतिकरं चैव मम प्रीतिकरं सदा ।
संक्षेपात्संप्रवक्ष्यामि सर्वशास्त्रार्थसंग्रहम् ॥

देव्यष्टेत्तिरादव्यनामस्तोत्रम्—

उमा माहेश्वरी काली गिरिजा शङ्करा शिवा ।
पार्वती चण्डिका गौरी जगन्माता शिवप्रिया ॥

End :

स्कन्दमाता हैमवती वशा त्रिपुरमर्दिनी ।
कृपाशीला वेदवेद्या वरदा सर्वमङ्गला ॥
अष्टोत्तरशतं नाम पार्वती(त्या)श्च महामते ।
यः पठेच्छृणुयाद्वापि रहस्यं परमामृतम् ॥

सर्वसिद्धिमवाप्नोति देवानामपि दुर्लभम् ।
महादेव महादेव पुत्रवद्योऽपि पाल(ठयेत्) ॥
तस्य मृत्युभयं नास्ति तस्य व्याधिभयं तथा ।
तस्य शत्रुभयं नास्ति लोके पूजार्थमेव हि ॥

No. 8862. देव्यष्टोत्तरशतनामस्तोत्रम्.

DĒVYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 1*b* of the MS. described under No. 8788.

Complete.

Similar to the above. Each of the one hundred and eight names of Dēvī begins with the word Śiva.

Beginning :

शिवप्रिया शिवाराध्या शिवेष्टा शिवकोमला ।
शिवोत्सवा शिवरसा शिवदिव्या शिखामणिः ॥
शिवपूर्णा शिवघना शिवस्था शिववल्लभा ।
शिवाभिन्ना शिवार्धाङ्गी शि . . . . शिवङ्करी ॥

End :

शिवशक्त्यैक्यललिता शिवक्रीडारसोज्वला ।
शिवसत्यपरानन्दप्रकाशानन्दचिद्घना ॥

Colophon :

इति श्रीदेव्यष्टोत्तरशतमूलं सम्पूर्णम् ॥

No. 8863. देव्यष्टोत्तरशतनामावलिः.

DĒVYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 1500, wherein this has been mentioned as Śivarahasyāṣṭōttaraśatanāmāvali.

Complete. Forms a portion of Śivarahasya.

Similar to the above.

Beginning :

शिवप्रियायै नमः । शिवाराध्यायै नमः । शिवेष्टायै नमः । शिव-कोमलायै नमः । शिवोत्सवायै नमः । शिवरसायै नमः । शिवदिव्यायै नमः । शिखामण्यै नमः । शिवपूर्णायै नमः । शिवघनायै नमः ।

End :

शिवचिन्तामणिपदायै नमः । शिवस्य नयनामृतायै नमः । शिव-संपूर्णविमलज्ञानदुग्धाब्धिशायिन्यै नमः । शिवेतरमहादावनिर्मलामृत-वर्षिण्यै नमः । शिवानन्दसुधापूर्णायै नमः । शिवभाग्याब्धिचन्द्रिकायै नमः । शिवशक्त्यैक्यललितायै नमः । शिवक्रीडारसोज्वलायै नमः ॥

Colophon :

इति श्रीशिवरहस्याष्टोत्तरशतनामावलिः समाप्ता ॥

No. **8864.** देव्यष्टोत्तरशतनामावलिः.

DĒVYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 5537, wherein this has been mentioned as Dēvīśivāṣṭōttaraśatanāmāvali.

Complete.

Similar to the above.

Beginning :

शिवप्रियायै नमः । शिवाराध्यायै नमः । शिवेष्टायै नमः । शिव-मङ्गलायै नमः ।

End :

शिवक्रीडारसोज्वलायै नमः । शिवशक्तिपरानन्दप्रकाशानन्दचि-द्घनायै नमः । श्रीपरब्रह्ममहिष्यै नमः ॥

Colophon :

इति देवीशिवाष्टोत्तरं सम्पूर्णम् ॥

(j) YAMUNĀ.

No. 8865. यमुनानामस्तोत्रम्.

YAMUNĀNĀMASTŌTRAM.

Page, 1. Lines, 26 on a page.

Begins on fol. 90*a* of the MS. described under No. 2981, wherein this has been shown as Yamunānāmastava.

Complete.

Contains verses giving eulogistic names addressed to Yamunā, the river Jumna.

Beginning :

त्रयी रसमयी सौरी ब्रह्मविद्या सुधावहा ।
नारायणीश्वरी ब्राह्मी धर्ममूर्तिः कृपावती ॥

End :

शरणागतसन्त्राणनिपुणा सगुणागुणा ॥
य एभिर्नामभिर्नित्यं यमुनां संस्मरेन्नरः ।
दूरस्थोऽपि स पापेभ्यो महद्भ्योऽपि विमुच्यते ॥

Colophon :

इति श्रीयमुनानामावली समाप्ता ॥

(k) LAKṢMĪ.

No. 8866. जानकीसहस्रनामस्तोत्रम्.

JĀNAKĪSAHASRANĀMASTŌTRAM.

Substance, paper. Size, $6\frac{3}{4} \times 3\frac{1}{4}$ inches. Pages, 32. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Contains one thousand names of Jānakī, *i.e*, Sītā who is considered to be an incarnation of the goddess Lakṣmī, the wife of Viṣṇu.

Beginning :

अथ श्रीजानकीदेव्याः सहस्रनामस्तोत्रं लिख्यते—
तदुक्तं सिद्धेश्वरतन्त्रे श्रीलक्ष्मण उवाच—
देवदेव जगन्नाथ कथयस्व महाप्रभो ।
नाम्नां सहस्रं जानक्याः श्रोतुमिच्छामि तत्त्वतः ॥

श्रीराम उवाच—

कथयामि भवत्प्रीत्या शृणु लक्ष्मण भक्तितः ।
अस्याः श्रीजानकीदेव्याः सहस्रं नामसंस्तवम् ॥

अस्य श्रीजानकीदिव्यसहस्रनामस्तोत्रमन्त्रस्य वागीश्वरी देवता, अनुष्टुप् छन्दः, सर्वकार्यार्थजपे विनियोगः ।

जानकी कमला विद्या सिद्धविद्या महात्मजा ।
निर्मला भाविनी भव्या सर्वमङ्गलरूपिणी ॥

End :

वैष्णवी विष्णुरूपा च विष्णुमायास्वरूपिणी ।
शिवेश्वरी शिवाराध्या भवानी भवमोचनी ॥

पुण्यं सहस्रनामेदं जानक्या भुवि दुर्लभम् ।
यः पठेत् प्रातरुत्थाय शुचिर्भूत्वा समाहितः ॥

विद्यानां पारगो विप्रः क्षत्रियो विजयी भवेत् ।
वैश्यस्तु धनलाभाढ्यः शूद्रस्तु सुखमश्नुते ॥

पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ।
इच्छाकामांस्तु कामार्थी धर्मार्थी धर्ममक्षयम् ॥

Colophon :

इति सिद्धेश्वरतन्त्रे जानकीसहस्रनामस्तोत्रं समाप्तम् ॥

No. **8867.** रमाष्टोत्तरशतनामावलिः.

RAMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 51*b* of the MS. described under No. 2965.

Complete.

Contains one hundred and eight names denoting Lakṣmī.

Beginning :

ईश्वर उवाच—

गुह्यं सुरासुरैर्जप्यं माङ्गल्यमघनाशनम् ।
नाम्नामष्टशतं वक्ष्ये सर्वसंपत्करं श्रियः ॥

श्रीं रं रमायै नमः । श्रीं पं पद्ममालाधरायै नमः । श्रीं पं पद्मायै नमः । श्रीं पं पद्मिन्यै नमः । श्रीं पं पद्मगन्धिन्यै नमः । श्रीं पुं पुण्य-

गन्धायै नमः। श्रीं सुं सुप्रसन्नायै नमः । श्रीं प्रं प्रसादसुमुख्यै नमः । श्रीं प्रं प्रभायै नमः । श्रीं कं कमलायै नमः । श्रीं क्षां क्षान्त्यै नमः। श्री लं लक्ष्म्यै नमः ।

End:

श्रीं हिं हिरण्यप्राकारायै नमः । श्रीं सं समुद्रवसनायै नमः । श्रीं जं जयायै नमः। श्रीं मं मङ्गल्यायै नमः । श्रीं तुं तुष्ट्यै नमः । श्रीं विं विष्णुवक्षःस्थलालयायै नमः । श्रीं विं विष्णुपत्न्यै नमः । श्रीं प्रं प्रसन्नाक्ष्यै नमः । श्रीं नां नारायणसमाश्रयायै नमः । . . .

इदमष्टशतं नाम्नां लक्ष्म्यास्स्तोत्रं शुभावहम् ।
आयुष्यं पापहरणं पुण्यं पुष्टिविवर्धनम् ॥
सर्वशत्रुप्रशमनं सर्वदुःखापनोदनम् ।

* * * *

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥

No. 8868. रमाष्टोत्तरशतनामावलिः.
RAMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 62*a* of the MS. described under No. 5987, wherein this has been mentioned as Lakṣmyaṣṭōttaraśatanāmāvali.

Incomplete.

Similar to the above.

Beginning:

रमायै नमः। भारत्यै नमः। भद्रायै नमः। भवान्यै नमः । विजयायै नमः । जयायै नमः। वाण्यै नमः । सरस्वत्यै नमः । गौर्यै नमः ।

End:

काल्यै नमः। माहेश्वर्यै नमः। शक्त्यै नमः। भैरव्यै नमः । भुवनेश्वर्यै नमः ॥

No. 8869. लक्ष्मीसहस्रनामावलिः. LAKṢMĪSAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 9 × 1⅜ inches. Pages, 56. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 23*a*. The other work herein is Viṣṇusahasranāmāvali 1*a*.

Complete.

Contains one thousand eulogistic names of the goddess Lakṣmī.

Beginning:

श्रियै नमः। पद्मायै नमः। प्रकृत्यै नमः। सत्त्वायै नमः। शान्त्यै नमः। जिते नमः। शक्त्यै नमः। अव्ययायै नमः। केवलायै नमः। निष्कलायै नमः।

End:

देव्यै नमः। हरिवक्षःस्थलालयायै नमः। विष्णुवक्षःस्थलगतायै नमः। किमतायै नमः। परमुच्यते(च्छ्रितायै) नमः। श्रीमहालक्ष्म्यै नमः। श्रियै नमः। श्रीरङ्गनायक्यै नमः॥

Colophon:

श्रीलक्ष्मीसहस्रनामार्चनं संपूर्णम्॥

No. 8870. लक्ष्मीसहस्रनामावलिः. LAKṢMĪSAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 19. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 286*b*. The other works herein are Bhagavadviṣaya (a commentary of Tiruvāymoḻi) 1*a*, Viṣṇusahasranāmāvali 274*a*.

Complete.

Same as the above.

No. 8871. लक्ष्मीसहस्रनामावलिः.

LAKṢMĪSAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 11¾ × 1⅜ inches. Pages, 46. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 4*a*. The other work herein is Varāhāṣṭōttaraśatanāmāvali 1*a*.

Complete.

Similar to the above.

See under No. 8869 for the beginning.

End:

विष्णुप्रियायै नमः । पद्मसंस्थायै नमः । परायै नमः । अतिमहिमायै नमः । देव्यै नमः । विष्णुवक्षःस्थलालयायै नमः ॥

No. 8872. लक्ष्मीसहस्रनामावलिः.

LAKṢMĪSAHASRANĀMĀVALIḤ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 104*a* of the MS. described under No. 115. The leaves are not properly arranged. Incomplete.

Similar to the above.

Beginning:

विकृत्यै नमः । सृष्ट्यै नमः । अव्ययायै नमः । प्रायण्यै नमः । प्राणदायै नमः । प्रह्व्यै नमः । विश्वायै नमः । पाण्डुरवासिन्यै नमः ।

End:

देव्यै नमः । हरिवक्षःस्थलालयायै नमः । विष्णुवक्षःस्थलगतायै नमः । श्रीमहालक्ष्म्यै नमः । श्रियै नमः ॥

No. **8873.** लक्ष्म्यष्टोत्तरशतनामस्तोत्रम्.

LAKṢMYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 4*b* of the MS. described under No. 6548.

Incomplete.

Contains one hundred and eight names in praise of Lakṣmī.

Beginning:

देवदेव महादेव त्रिलोकज्ञ महेश्वर ।
करुणाकर सर्वेश भक्तानामिष्टकाम्यया ॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ।

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ।
* * * *

अस्य श्रीलक्ष्मीनामाष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य श्रीमहाविष्णुर्भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता ।

* * * *

प्रकृतिं विकृतिं विश्वां सर्वभूतविहारिणीम् ।
चञ्चलां चपलां मायां सुलभां प्रणवात्मिकाम् ॥

End:

धनधान्यकरीं शुद्धां वसुधां वसुधारिणीम् ।
नमामि मङ्गलां देवीं विष्णु(वक्षःस्थलस्थिताम् ॥)

No. **8874.** लक्ष्म्यष्टोत्तरशतनामस्तोत्रम्.

LAKṢMYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 24 on a page.

Begins on fol. 12*a* of the MS. described under No. 5959.

Complete.

Similar to the above.

Beginning:

अप्रमेयप्रभाचा(व)स्य विष्णोः पत्नीं यशस्विनीम् ।
मातरं सर्वलोकस्य प्रपद्ये शरणं प्रि(श्रि)यम् ॥

पुलस्त्य उवाच—

गुह्यं सुरासुरैर्जेप्यं माङ्गल्यमघनाशनम् ।
सर्वसम्पत्करं वक्ष्ये नाम्नामष्टोत्तरं शतम् ॥
प्रकृतिं विकृतिं विद्यां सर्वभूतहितां पराम् ।
श्रद्धां विभूतिं सुरभिं नमामि प्रणवात्मिकाम् ॥

End:

विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रयाम् ।
इदमष्टशतं नाम्नां लक्ष्म्याः स्तोत्रं शुभावहम् ॥

* * * *

प्रसीद कमले देवि नाममालामिमां शुभाम् ।
गृहाण कृपया प्रीत्या मालां सौमनसीमिव ॥
एवमष्टोत्तरशतं यः पठेत्सततं नरः ।
श्रीमान् स पापयुक्तोऽपि लक्ष्म्याः पूर्णप्रसादवान् ॥

No. **8875.** लक्ष्म्यष्टोत्तरशतनामस्तोत्रम्.

LAKṢMYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 11 on a page.

Begins on fol. 11*a* of the MS. described under No. 2883, wherein this has been mentioned as Māhālakṣmyaṣṭōttaraśata in the list of other works.

Complete.

Same as the above.

Colophon:

इति महालक्ष्म्यष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

No. **8876.** लक्ष्म्यष्टोत्तरशतनामस्तोत्रम्.

LAKṢMYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 8827.

Complete.

Similar to the above.

Beginning:

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥

अस्य श्रीमहालक्ष्म्यष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता ।

* * * *

जगन्माता जगद्धात्री जगदानन्ददायिनी ।
जनार्दनप्रिया ज्योतिः पुन्नागकुसुमप्रिया ॥
पद्मासना पद्मकरा पद्माक्षी पद्मसम्भवा ।
पद्मिनी पद्मवदना पद्मपाटलगान्धिनी ॥

End:

सौभाग्यलक्ष्मीः सर्वेशी सर्वमङ्गलदायिनी ।
समस्तलोकजननी श्रीकरी भुवनेश्वरी ॥

* * * *

श्रवणाद्भुक्तिमुक्तिः स्यात् स्मरणात् सर्वसंपदः ।
अष्टोत्तरशताभ्यस्य(स्त)स्तोत्रस्य प्राप्नुवन्ति ते ॥

Colophon:

इति लक्ष्म्यष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

No. **8877.** लक्ष्म्यष्टोत्तरशतनामस्तोत्रम्.

LAKṢMYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 22*a* of the MS. described under No. 5938.
Complete. From Padmapurāṇa.
Similar to the above.

Beginning:

सूत उवाच—

अस्य श्रीलक्ष्म्यष्टोत्तरमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता ।

* * * *

प्रकृतिं विकृतिं विद्यां सर्वभूतहितां वरीम् ।
श्रद्धां विभूतिं सुरभिं नमामि प्रणवात्मिकाम् ॥

End:

वागीश्वरीं महालक्ष्मीं देवकीं देवमातरम् ।
सिद्धिलक्ष्मीं महाविद्यां नमामि भुवनेश्वरीम् ॥

* * * *

प्रातःकाले पठेन्नित्यं सर्वदुःखोपशान्तये ।

* * * *

Colophon:

इति पद्मपुराणे महालक्ष्म्यष्टोत्तरं संपूर्णम् ॥

No. **8878.** लक्ष्म्यष्टोत्तरशतनामावलिः.

LAKṢMYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 5789.

Complete.

Similar to the above.

Beginning:

प्रकृत्यै नमः । विकृत्यै नमः । विद्यायै नमः । सर्वभूतनिवासिन्यै नमः । सिद्धायै नमः । भक्त्यै नमः । विभूत्यै नमः । प्रणवात्मिकायै नमः ।

End:

वरारोहायै नमः । देवक्यै नमः । देवमात्रे नमः । सिद्धलक्ष्म्यै नमः । महाविद्यायै नमः । गणेशाङ्कनिवासिन्यै नमः । श्रीमहालक्ष्म्यै नमः ॥

No. 8879. लक्ष्म्यष्टोत्तरशतनामावलिः.

LAKṢMYASṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, 6¾ × 1⅜ inches. Pages, 11. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 15*a*. The other works herein are Mahālakṣmīpūjāvidhāna 1*a*, Lalitāṣṭōttaraśatanāmāvali 21*a*, Mēghadūtaślōkas with Telugu meaning 24*a*.

Complete.

Similar to the above.

Beginning:

महालक्ष्म्यै नमः ओम् । महाकाल्यै नमः ओम् । महाकन्यायै नमः ओम् । भक्तानुग्रहकारिण्यै नमः ओम् । ईशायै नमः ओम् । प्रोच्चायै नमः ओम् । महामायायै नमः ओम् । हृल्लेखायै नमः ओम् ।

End:

सर्वोपद्रवनाशिन्यै नमः ओम् । सर्वकामफलप्रदायै नमः ओम् । सर्वशास्त्रविशारदायै नमः ओम् । सुपुष्पवासिन्यै नमः ओम् । श्रीमहा लक्ष्म्यै नमः ओम् ॥

No. 8880. लक्ष्म्यष्टोत्तरशतनामावलिः.

LAKṢMYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, 11¼ × 1½ inches. Pages, 8. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol 19*a*. The other works herein are Kṛṣṇāṣṭōttaraśatanāmāvali 1*a*, Rāmāṣṭōttaraśatanāmāvali 5*b*, Vēṅkaṭēśāṣṭōttaraśatanāmāvali 10*a*, Narasiṁhāṣṭōttaraśatanāmāvali 15*a*, Raṅganāthāṣṭōttaraśatanāmāvali 23*a*, Yadugirinārāyaṇāṣṭōttaraśatanāmāvali 27*a*, Varadarājāṣṭōttaraśatanāmāvali 31*b*, Divyadēśamaṅgalāśāsana 38*a*.

Complete.

Similar to the above.

Beginning :

प्रकृत्यै नमः । विकृत्यै नमः । विद्यायै नमः । सर्वभूतहितायै नमः । परायै नमः । श्रद्धायै नमः । पद्मालयायै नमः । पद्मायै नमः ।

End :

देवमात्रे नमः । सिद्धलक्ष्म्यै नमः । महाविद्यायै नमः । भुवनेश्वर्यै नमः । श्रीरङ्गनायक्यै नमः । श्रियै नमः । श्रीनिवासाय नमः ॥

No. **8881.** लक्ष्म्यष्टोत्तरशतनामावलिः.

LAKṢMYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 122*a* of the MS. described under No. 115.

Complete.

Similar to the above.

Beginning :

क्षीराब्धिसंभवायै (नमः) ।
अनुग्रहायै न(मः) ।
अनघायै नमः ।
हरिवल्लभायै (नमः) ।
अमोघायै (नमः) ।

आद्दतायै नमः ।
दीप्तायै न(मः) ।
अशोकायै (नमः) ।
शोकनाशिन्यै (नमः) ।

End :

प्रसन्नाक्ष्यै नमः ।
नारायणसमाश्रिता(यै नमः) ।

नानागन्धसमायुक्तं गोघृतेन समन्वितम् ।
धूपं गृहाण देवि त्वं सर्वलोकनमस्कृते ॥

* * * *

पुष्पाञ्जलिः—

पुत्रान् देहि यशो देहि सौख्यसौभाग्यमेव च ।
जयारोग्यं बलं देहि देवि त्वं शरणागता ॥

No. 8882. लक्ष्म्यष्टोत्तरशतनामावलिः.

LAKṢMYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 21*a* of the MS. described under No. 8632

Complete.

Similar to the above.

Beginning:

महालक्ष्म्यै नमः । महाकाल्यै नमः । महासरस्वत्यै नमः । महाकनकायै नमः । महानद्यै नमः । भक्तानुग्रहकारिण्यै नमः । प्रकाशात्मरूपिण्यै नमः ।

End:

प्रसन्नदेव्यै नमः । मम सर्वदायै नमः । पराङ्कुशायै नमः । महालक्ष्मीमहाकालीमहासरस्वत्यै नमः ॥

No. 8883. वरलक्ष्म्यष्टोत्तरशतनामावलिः.

VARALAKṢMYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 17 on a page.

Begins on fol. 13*a* of the MS. described under No. 3846.

Complete.

Similar to the above. This collection of names is recited at the close of the Varalakṣmīvrata.

Beginning:

पद्मासनायै नमः । पद्मनयनायै नमः । सर्वलोकपूजितायै नमः । नारायणप्रियायै नमः । वरप्रदायै नमः । सर्वदायै नमः ।

End:

द्युतिकारिण्यै नमः । प्रीतिवर्धनायै नमः । स्वस्तिकारिण्यै नमः । कुन्ददन्तायै नमः । श्रीवरलक्ष्म्यै नमः । अष्टोत्तरशतनामपूजां समर्पयामि ॥

No. 8884. सीताष्टोत्तरशतनामावलिः.
SĪTĀṢṬOTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 48b of the MS. described under No. 8859.

Complete.

Contains one hundred and eight names of Sītā, wife of Rāma.

Beginning :

श्रीसीतायै नमः । रामपत्न्यै नमः । जानक्यै नमः । भू(सु)तायै नमः । वीरपत्न्यै नमः । विशालाक्ष्यै नमः । सर्वाङ्गसुन्दरायै नमः ।

End :

ईश्वर्यै नमः । लोकमात्रे नमः । सर्वप्रभवसञ्ज्ञायै नमः । श्रीसीतायै नमः ॥

सीताष्टोत्तरनामपूजा सम्पूर्णा ॥

(l) VALLABHĀCĀRYA.

No. 8885. वल्लभाचार्यनामावलिः.
VALLABHĀCĀRYANĀMĀVALIḤ.

Pages, 4. Lines, 25 on a page.

Begins on fol. 185b of the MS. described under No. 2981, wherein this has been given as Ācāryanāmāvali in the list of other works.

Complete.

Contains the eulogistic names of Vallabhācārya, the founder of a religious sect named after him : by Harirāya.

Beginning :

श्रीवल्लभाख्यस्वस्वामिनामानि स्वीयतुष्टये ।
यथामति वदिष्यामि तदाश्रितजनाश्रितः ॥

नामावलिः—

श्रीवल्लभाय नमः । श्रीलक्ष्मीपतये नमः । गोपीनाथजनकाय नमः । श्रीविट्ठलेशस्वाखिलमाहात्म्यस्थापकाय नमः । तीर्थपात्राचरणसञ्चारणकर्त्रे नमः । वादिबृन्दमुखध्वंसकाय नमः ।

End :

परमानन्दसुधाभारभरितमूर्तये नमः । हरिदासनाथाय नमः । अस्मत्सर्वस्वरूपाय नमः ॥

इति नामानि जप्यानि श्रीवल्लभ महाप्रभोः ।
तत्पदाम्भोजयुगलभक्तिमात्रार्थिभिस्सदा ॥

Colophon :

श्रीहरिरायकृता श्रीमादाचार्यनामावलिः ॥

(*m*) VIṢṆU.

No **8886.** कृष्णचतुर्विंशतिस्तोत्रम्.
KṚṢṆACATURVIṀŚATISTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under No. 2571

Complete.

Gives the twenty-four eulogistic names of God Kṛṣṇa.

Beginning :

केशवं केशिमथनं वासुकेर्भोगशायिनम् ।
रासक्रीडाविलासाढ्यं कृष्णं वन्दे जगद्गुरुम् ॥
नारायणं नरहरिः(रिं) नारदादिभिरर्चितम् ।
तारकं भवबन्धानां कृष्णं वन्दे जगद्गुरुम् ॥
माधवं मधुरावासं भूधरोद्धारकं विभुम् ।
आधारं सर्वभूतानां कृष्णं वन्दे जगद्गुरुम् ॥

End :

श्रीकृष्णं गोकुलावासं साकेतपुरवासिनम् ।
आकाशकालदुग्द्रू(दिग्रू)पं [श्री]कृष्णं वन्दे जगद्गुरुम् ॥
कृष्णस्तोत्रं चतुर्विंशए(ति)तत्त्वं नामरूपिणम् ।
यः पठेत्प्रातरुत्थाय सर्वपापैः प्रमुच्यते ॥

No. **8887.** कृष्णद्वादशनामस्तोत्रम्.
KṚṢṆADVĀDAŚANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 13*b* of the MS. described under No. 7536, wherein this has been given as Dvādaśanāmastōtra among the other works.

Complete.

Gives twelve names in praise of Śrī-Kṛṣṇa. Related by Kṛṣṇa to Arjuna.

Beginning :

किं तैर्नामसहस्रैस्तु विज्ञातैस्तु तवार्जुन ।
यानि नामानि वक्ष्यामि तैस्तु पापैः प्रमुच्यते ॥
प्रथमं तु हरिं विद्यात् द्वितीयं केशवं तथा ।
तृतीयं पद्मनाभञ्च चतुर्थं वामनं तथा ॥

End :

अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ।
पौर्णमास्याममावास्यां (यां वा) द्वादश्यां तु विशेषतः ॥

Colophon :

इति कृष्णार्जुनसंवादे द्वादशनामस्तोत्रं सम्पूर्णम् ॥

No. 8883. कृष्णसहस्रनामस्तोत्रम्.

KṚṢṆASAHASRANĀMASTŌTRAM.

Pages, 24. Lines, 28 on a page.

Begins on fol. 108*a* of the MS. described under No. 2981, wherein this work has been mentioned as Puruṣōttamasahasranāma.

Complete.

Gives one thousand names in praise of Śrī-Kṛṣṇa. Taken from Bhāgavatasārasamuccaya and related by Vaiśvānara.

Beginning :

पुराणपुरुषो विष्णुः पुरुषोत्तम उच्यते ।
नाम्नां सहस्रं वक्ष्यामि तस्य भागवतोद्धृतम् ॥
* * * *
कृष्णनामसहस्रस्य ऋषिरग्निर्निरूपितः ।
गायत्री च तथा छन्दो देवता पुरुषोत्तम ॥
* * * *
श्रीकृष्णः सच्चिदानन्दो नित्यलीलाविनोदकृत् ।
सर्वागमाविनोदी च लक्ष्मीशः पुरुषोत्तमः ॥

अादिकालः सर्वकालः कालात्मा मायया वृतः ।
भक्तोद्धारप्रयत्नात्मा जगत्कर्ता जगन्मयः ॥

End:

आदित्यान्तर्गतः कालः द्वादशात्मा सुपूजितः ।
श्रीभागवतरूपश्च सर्वार्थफलदायकः ॥
इतीदं कीर्तनीयस्य हरेर्नामसहस्रकम् ।
पञ्चसप्ततिविस्तीर्णं पुराणान्तरभाषितम् ॥

* * * *

यः कृष्णभक्तिमिह वाञ्छति साधनौघैः
नामानि भासुरयशांसि जपेत् स नित्यम् ।
तं वै हरिः स्वपुरुषं कुरुतेऽतिशीघ्र-
मात्मार्पणं समधिगच्छति भक्तिकृष्टः ॥
श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रु-
ग्राजन्यवंशदहनानपवर्गवीर्य ।
गोविन्द गोपवानिताव्रजभृत्यगीत-
तीर्थश्रवःश्रवणमङ्गल पाहि भृत्यान् ॥

Colophon:

इति श्रीभागवतसारसमुच्चये वैश्वानरोक्तं सहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. **8889.** कृष्णसहस्रनामस्तोत्रम्.

KṚṢṆASAHASRANĀMASTŌTRAM.

Pages, 18. Lines, 24 on a page.

Begins on fol. 65*b* of the MS. described under No. 5959.

Complete.

Similar to the above.

Beginning:

श्रीकृष्णाय श्रुताध्या(द्या)य श्रीमयाय श्रुताय च ।
श्रीशाय सार्वभौमाय श्रीदाय श्रीमते नमः ॥

श्रीवत्साङ्काय सिद्धाय शृङ्गाराय जितात्मने ।
स्वराय परतत्त्वाय वृष्टिपाताय ते नमः ॥

End:

कृष्णाय यादवेन्द्राय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥

Colophon:

श्रीकृष्णसहस्रनामानि संपूर्णानि ॥

No. **8890.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 19*b* of the MS. described under No. 5938.

Complete. From Brahmāṇḍapurāṇa.

Gives one hundred and eight names in praise of Śrī-Kṛṣṇa.

Beginning:

धरण्युवाच—

शेषशेष महाबाहो धृतास्मि तव मौलिभिः ।
पूतास्मि कृतकृत्यास्मि त्वयैव विहिता पुरा ॥

* * * *

शेष उवाच—

वसुन्धरे वरारोहे जनानामस्ति मुक्तिदम् ।
सर्वमङ्गलमाङ्गल्यमणिमाद्यष्टसिद्धिदम् ॥
कृष्णनामामृतं नाम परमानन्ददायकम् ।

* * * *

अस्य श्रीकृष्णाष्टोत्तरशतनामनां शेषभगवान् ऋषिः, श्रीकृष्णः परमात्मा देवता, श्रीकृष्णप्रीत्यर्थे विनियोगः ।

श्रीकृष्णाष्टोत्तरशतनामस्तोत्रमन्त्रजपं करिष्ये—

श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ।

End:

सर्वग्रहानुग्रहभाक् सर्वप्रियतमो भवेत् ।
सर्वपापप्रशमनं कृष्णसायुज्यमाप्नुयात् ॥

Colophon:

इति ब्रह्माण्डपुराणे उपरिखण्डे धरणीशेषसंवादे श्रीकृष्णाष्टोत्तर-शतं नाम स्तोत्रं संपूर्णम् ॥

No. **8891.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 187*b* of the MS. described under No. 5661, wherein this has been called Kṛṣṇāṣṭōttara.

Complete.

Same as the above without the introductory and the benedictory portions

Beginning:

श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥
श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ।
चतुर्भुजात्तचक्रासिगदाशङ्खाद्युदायुधः । ।

End:

जलक्रीडासमासक्तगोपीवस्त्रापहारकः ।
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः ॥
सर्वभूतात्मकस्सर्वग्रहरूपी परात्परः ।
एवं श्रीकृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ॥

No. 8892. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 5938.

Complete.

Same as the above except the benedictory portion at the end.

See under the previous number for the beginning.

End :

एवं कृष्णस्य देवस्य नाम्नामष्टोत्तरं शतम् ॥
कृष्णेन कृष्णभक्तेन श्रुत्वा गीतामृतं फलम् ।
स्तोत्रं कृष्णप्रियकरमतस्तस्मान्मया कृतम् ॥

Colophon :

कृष्णनामाष्टोत्तरशतं सम्पूर्णम् ॥

No. 8893. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 24 on a page.

Begins on fol. 56*a* of the MS. described under No. 5959.

Complete.

Same as the above.

No. 8894. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 5938, wherein this has been given as Kṛṣṇāṣṭōttaraśatanāmāvali among the other works.

Incomplete.

Same as the above.

No. 8895. कृष्णाष्टोत्तरशतनामस्तोत्रम्.
KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 2037.

Wants beginning.

Same as the above.

No. 8896. कृष्णाष्टोत्तरशतनामस्तोत्रम्.
KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 401.

Complete. This is extracted from Brahmāṇḍapurāṇa.

Same as the above.

Colophon:

इति ब्रह्माण्डपुराणे धरणीशेषसंवादे श्रीकृष्णाष्टोत्तरशतदिव्यनाम-स्तोत्रं समाप्तम् ॥

No. 8897. कृष्णाष्टोत्तरशतनामस्तोत्रम्.
KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 15*a* of the MS. described under No. 5945.

Complete.

Same as the above.

No. 8898. कृष्णाष्टोत्तरशतनामस्तोत्रम्.
KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 7. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 9*a*. The other work herein is Dēvanāyakapañcāśat 1*a*.

Complete.

Same as the above.

See under the previous number for the beginning.

End:

एवं कृष्णस्य देवस्य नाम्नामष्टोत्तरं शतम् ।
तस्मिन् मुक्तिं च भक्तिं च वासुदेवः प्रदास्यति ॥

No. 8899. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, $12\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 3. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 3*b*. The other work herein is Kṛṣṇāṣṭōttaraśatanāmāvali 1*a*.

Complete.

Same as the above.

No. 8900. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches Pages, 5. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 21*a*. The other works herein are Yatirājasaptati 1*a*, Catuśślōkī 10*a*, Gōpālaviṁśati 12*a*, Nṛsiṁhāṣṭōttaraśatanāmastōtra 15*a*, Kṛṣṇāṣṭōttaraśatanāmāvali 18*a*, Nṛsiṁhāṣṭōttaraśatanāmāvali 24*a*, Rāmāṣṭōttaraśatanāmastōtra 25*a*, Gāyatrīrāmāyaṇa 27*a*, Kṣamāṣōḍaśī 29*a*, Daśāvatārastōtra 33*b*, Mukundamālā 37*a*, Aṣṭaślōkī 43*b*. Bhūstuti 46*a*, Raghuvīragadya 47*a*.

Complete.

Same as the above.

No. **8901.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 3*b* of the MS. described under No. 8788.

Complete.

Same as the above.

No. **8902.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 5987.

Complete.

Same as the above.

No. **0893.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, 9 × 1¼ inches. Pages, 6. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kṛṣṇāṣṭōttaraśatanāmāvali 3*b*, Rāmāṣṭōttaraśatanāmāvali 8*a*, Vēṅkaṭēśāṣṭōttaraśatanāmāvali 12*a*.

Complete.

Same as the above.

No. **8904.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 2. Lines, 6 on a page. Character, Grantha Condition, injured. Appearance, old.

Begins on fol. 9*a*. The other works herein are Dēvanāyakapañcāśat 1*a*, Catuśślōkī 6*a*, Jitantēstōtra 7*a*, Kṛṣṇāṣṭōttaraśatanāmāvali 10*a* Mukundāṣṭaka 11*a*, Kṛṣṇāṣṭaka 12*a* and 70*a*,

Haryaṣṭaka 13*a*, Śrīstuti 14*a*, Daśāvatārastōtra 18*a*, Gōpālaviṁśati 20*a*, Hayagrīvastōtra 23*a*, Bhagavaddhyānasōpāna 26*a*, Abhītistōtra 28*a*, Śaraṇāgatidīpikā 32*a*, Nigamāntācāryacūrṇikā 39*a*, Saptatiratnamālikā 42*a*, Ācāryāṣṭaka 50*a*, Dēśikavigrahadhyānasōpāna 52*a*. Dēśikastōtraviṁśati 54*a*, Catuśślōkī 58*a*, Bhagavaddhyānasōpāna 62*a*, Kṛṣṇastōtra 67*a*, Mukundāṣṭaka 69*a*, Daśāvatārastōtra 71*a*.

Complete.

Same as the above.

No. **8905**. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, 12¾ × 1¼ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kṛṣṇāṣṭōttaraśatanāmāvali 3*a*, Śivasahasranāmastōtra 6*a*.

Complete.

Same as the above.

No. **8906**. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 14*b* of the MS. described under No. 8632.

Complete.

Same as the above.

No. **8907**. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 2857.

Complete.

Same as the above.

No. 8908. कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 5338, and not on 11*a*, as shown therein.

Complete.

Same as the above except the preliminary and the concluding portions.

Beginning:

अस्य श्रीकृष्णाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य श्रीवेदव्यासभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता । श्रीकृष्णप्रीत्यर्थे विनियोगः ।

श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ।

End:

इमं मन्त्रं स्मरन्नित्यं जपन्नेव दिवानिशम् ।
सर्वपापविनिर्मुक्तः सर्वसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे धरणीशेषसंवादे श्रीकृष्णाष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ॥

No. 8909. कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 15*b* of the MS. described under No. 8632.

Complete.

Gives one hundred and eight names of Śrī-kṛṣṇa to be repeated at the time of worship.

Beginning:

ओं श्रीकृष्णाय नमः । ओं कमलानाथाय नमः । ओं वासुदेवाय नमः । ओं सनातनाय नमः ।

End:

ओं सर्वतीर्थात्मकाय नमः । ओं सर्वग्रहरूपिणे नमः । ओं परात्पराय नमः । एवं श्रीकृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ॥

No. **8910.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 8904.

Complete.

Same as the above.

No. **8911.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 70*a* of the MS. described under No. 2380.

Incomplete.

Same as the above.

No. **8912.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 8905.

Complete.

Same as the above.

Colophon:

चतुर्थ्यन्तं सम्पूर्णम् ॥

No. **8913.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 6485.

Complete.

Same as the above.

No. **8914.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 98*a* of the MS. described under No. 3472, wherein this has been mentioned as Kṛṣṇāṣṭōttaratatanāmāni in the list of other works.

Complete.

Same as the above except in the beginning.

Beginning :

अस्य श्री[शतदिव्य]कृष्ण[ाष्टोत्तरशत]दिव्यनामाष्टोत्तरशतमन्त्रस्य श्रीशेषभगवानृषिः, अनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता, श्रीं बीजं, क्लीं शक्तिः, स्वाहेति कीलकं, श्रीकृष्णप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

श्रीकृष्णाय नमः । कमलानाथाय नमः ।

No. **8915.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 3*b* of the MS. described under No. 8903.

Complete.

Same as the above.

No. **8916.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 55*b* of the MS. described under No. 8859

Incomplete.

Same as the above.

No. 8917. कृष्णाष्टोत्तरशतनामावलिः.
KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 67*b* of the MS. described under No. 2825, wherein this work has been omitted to be mentioned.

Incomplete.

Same as the above.

No. 8918. कृष्णाष्टोत्तरशतनामावलिः.
KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8899.

Complete.

Same as the above.

The MS. is dated the second day of the bright fortnight in the month of Śrāvaṇa of the year Plavaṅga.

No. 8919. कृष्णाष्टोत्तरशतनामावलिः.
KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 8880.

Complete.

Same as the above.

No. 8920. कृष्णाष्टोत्तरशतनामावलिः.
KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 30*a*. The other works herein are Gōvindadaśaka 1*a*, Rāmabhujaṅga 2*a*, Rāmastavarāja 5*a*, Dattātrēyastōtra 10*a*, Mādhavastavarāja 13*a*, Śatāparādhastōtra 20*b*, Gautamastōtra 23*a*,

Candraśēkharāṣṭaka 26*a*, Mahādēvāṣṭōttaraśatanāmāvali 28*a*, Bhāratasāvitrī 33*a*, Śivasahasranāman 36*a*, Maṅgalāṣṭaka 41*a*.

Complete.

Same as the above.

No. **8921.** कृष्णाष्टोत्तरशतनामावलिः.
KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 8900.

Complete.

Same as the above.

Colophon:

कृष्णाष्टोत्तरशतकं सम्पूर्णम् ॥

No. **8922.** केशवादिनामस्तोत्रम्.
KEŚAVĀDINĀMASTŌTRAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 121*a* of the MS. described under No. 5660, wherein the work has been mentioned as Kēśavanāmāni in the other works.

Complete.

This contains 24 stanzas, each of which is addressed to the tongue of the devotee which is asked to taste always the bliss, the name and the feet of Viṣṇu mentioned under 24 different names, beginning with Kēśava and ending with Śrī-Kṛṣṇa, in the stanzas.

Beginning:

केशवब्रह्मानन्दरसं केशवनामसुधारसम् ।
केशवपादाम्बुजरसं पिब जिह्वे निरन्तरम् ॥
नारायणब्रह्मानन्दरसं नारायणनामसुधारसम् ।
नारायणपादाम्बुजरसं पिब जिह्वे निरन्तरम् ।

End :

पुरुषोत्तमब्रह्मानन्दरसं पुरुषोत्तमनामसुधारसम् ।
पुरुषोत्तमपादाम्बुजरसं पिब जिह्वे निरन्तरम् ॥

केशव, नारायण, माधव, गोविन्द . . . .
जनार्दन, उपेन्द्र, हरे, श्रीकृष्ण.

No. 8923. गोपालसहस्रनामस्तोत्रम्.

GŌPĀLASAHASRANĀMASTŌTRAM

Substance, paper. Size, $7\frac{7}{8} \times 6\frac{1}{2}$ inches. Pages, 8. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete. This is taken from Sammōhanatantra.

Similar to the one described under No. 8888, Gōpāla being another name of Śrī-Kṛṣṇa.

Beginning :

कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम् ।
ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारक ॥
त्वमेव पूज्यसे लोके ब्रह्मविष्णुसुरादिभिः ।
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर ॥

* * * *

ध्यानम्—

कृष्णेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥

ओं श्रीगोपालो महीपालो वेदवेदाङ्गपारगः ।
कृष्णः कमलपत्राक्षः पुण्डरीकस्सनातनः ॥

End :

भक्ताभीष्टप्रदस्सर्वभक्ताघौघनिकृन्तकः ।
अपारकरुणासिन्धुर्भगवान् भक्तवत्सलः ॥

* * * *

श्रीगोपालो मही(हा)देवि वसेत्तस्य गृहे तदा ।
यद्गृहे (तु) सहस्रञ्च नाम्नां तिष्ठति पूजितम् ॥

Colophon:

इति श्रीसम्मोहनतन्त्रे हरगौरीसंवादे श्रीगोपालसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. **8924.** गोपालाष्टोत्तरशतनामस्तोत्रम्.

GŌPĀLĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 152*a* of the MS. described under No. 29.

Complete.

Similar to the one described under No. 8889.

Beginning:

गोपालबालतनयो गोपगोकुलनायकः ।
गोपालो गोकुलानन्दो गोपसंरक्षणोत्सुकः ॥

End:

गोपेशो गोकुलाराध्यो गोगोपीजनवल्लभः ।
इत्येवं गोपिकानाथनाम्नामष्टोत्तरं शतम् ॥
साज्यं सुवर्तिसंयुक्तं वह्निना योजितं प्रियम् ।
गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापह(म्) ॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ।
त्राहि मां नरकाद्घोर(रात्) दिव्यज्योतिर्नमोऽस्तु ते ॥ दीपम् ॥

No. **8925.** गोपालाष्टोत्तरशतनामावलिः.

GŌPĀLĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 149*a* of the MS. described under No. 29.

Complete.

Similar to the above. These names are intended to be recited at the time of worship.

Beginning:

गोपालबालतनयाय नमः । गोपगोकुलनायकाय नमः । गोपालाय नमः ।गोकुलानन्दाय नमः । गोपसंरक्षणोत्सुकाय नमः ।

End:

गोपीशाय नमः । गोकुलाराध्याय नमः । गोपीजनवल्लभाय नमः ॥

Colophon:

इति गोपालाष्टोत्तरशतनामावलिः समाप्ता ॥

No. 8926. दत्तात्रेयद्वादशनामस्तोत्रम्.

DATTĀTRĒYADVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 78*b* of the MS. described under No. 21.

Complete.

Gives twelve names in praise of Dattātrēya, the son of Atri and Anasūya. He is considered to be an incarnation of Viṣṇu. This Stōtra is also known as Mantrarāja, and a repetition of these names is considered to remove one's sins.

Beginning:

अस्य श्रीदत्तात्रेयद्वादशनामस्तोत्रमहामन्त्रस्य परमहंस ऋषिः, श्रीदत्तात्रेयपरमात्मा देवता, श्रीदत्तात्रेयप्रसाद . . विनियोगः ।

प्रथमस्तु महायोगी द्वितीयः प्रभुरीश्वरः ।
तृतीयश्च त्रयीमूर्तिः चतुर्थो ज्ञानसागरः ॥

End:

एतानि द्वादशनामानि आत्रेयस्य महात्मनः ।
मन्त्रराजमिति ख्यातं सर्वपापहरं परम् ॥

* * * *

जयतु जयतु दत्तो अ(ह्य)त्रिनन्द्प्रसूतो जयतु जयतु दत्तोअ(ऽथा)नसूया-
तनूजः ।
जयतु जयतु दत्तस्सर्वयोगीन्द्रवन्द्यः जयतु जयतु दत्तो भोगमोक्षप्रदाता ॥

No. 8927. दत्तात्रेयपञ्चाशन्नामस्तोत्रम्.

DATTĀTRĒYAPAÑCĀŚANNĀMASTŌTRAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 10*a* of the MS. described under No. 5868.

Complete.

Gives the fifty eulogistic names of Dattātrēya. A repetition of these names is considered to make efficacious the Mantra repeated by a person.

Beginning :

अस्य श्रीदत्तात्रेयपञ्चाशन्नामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, दत्तात्रेयो देवता, श्रीदत्तात्रेयाय जपे विनियोगः ।

अत्रिभूरानसूयेयो हरिर्जैवातृकानुजः ।
दुर्वासस्याग्रजः कृष्णोऽवधूतः कपिलानुजः ॥

End :

मायावान्मायिकं वेत्ति यं विना नास्ति हि द्वयः(म्) ।
अधिष्ठानतया तस्य सोऽहं दत्तो न संशयः ॥

* * * *

सर्वश्च ध्यानयोगेन ब्राह्मणानाञ्च भोजनम् ॥
सर्वत्र तन्मयं जप्यं तस्य चारित्रकीर्तनात् ।
मन्त्रसिद्धिर्भवेच्छीघ्रं वाञ्छितार्थप्रदायिनी ॥

No. 8928. दत्तात्रेयसहस्रनामस्तोत्रम्.

DATTĀTRĒYASAHASRANĀMASTŌTRAM.

Pages, 10. Lines, 9 on a page.

Begins on fol. 74*a* of the MS. described under No. 21.

Complete. Bhaviṣyōttarapurāṇa.

Gives one thousand names in praise of Dattātrēya.

Beginning:

प्रणम्य परमानन्दमादिदेवं जगत्पतिम् ।
दत्तात्रेयं महात्मानं सत्यविज्ञानभास्करम् ॥
नमस्ते शिवरूपाय नित्यानन्दाय निर्गुणे(ण) ।
ज्ञानगम्याय शुद्धाय गुरवे ब्रह्ममूर्तये ॥

* * * *

अस्य श्रीदत्तात्रेयसहस्रनामस्तोत्रमहामन्त्रस्य परमहंस ऋषिः, अनुष्टुप् छन्दः, दत्तात्रेयपरमात्मा देवता, ओं इति बीजम्, दं इति शक्तिः, तं इति कीलकम्, त्यं इति व्यापकम्, मम श्रीदत्तात्रेयकारुण्यप्रसाद . . विनियोगः ।

* * * *

ओं दत्तात्रेयो महायोगी योगीश अमरः प्रभुः ।
मुनिर्दिगम्बरो बालो मायामुक्तो मदापहः ॥
अवधूतो महानादः शङ्करोऽमरवल्लभः ।
महादेवश्चादिदेवः पुराणप्रभुरीश्वरः ॥

End:

नामरूपान्तकश्चैव यद्वाग्ज्ञानगोचरम् ।
सर्वं दत्तात्मकं विश्वं भावाभावोद्भवादिकम् ॥
इति श्रीपरमं गुह्यं पवित्रं पापनाशनम् ।
दत्तात्रेयसहस्राख्यं नामस्तोत्रं कृतं मया ॥
अतीतानागतश्चैव वर्तमानं तथैव च ।

ते विदुर्ये पठन्त्येतद्गुह्याद्गुह्यतरं तपः ॥

* * * *

देशकालार्थनिर्मुक्तं देशकालगुणाश्रयम् ।
गुणधन्यपवित्रञ्च दत्तात्रेयं गुरुं नुमः ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे सिंहाद्रिखण्डे दत्तात्रेयसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. **8929.** दत्तात्रेयसहस्रनामस्तोत्रम्.

DATTĀTRĒYASAHASRANĀMASTŌTRAM.

Pages, 18. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 5445.

Complete.

Similar to the above.

The repetition of these names is here stated to absolve one of the sin of murdering a Brahmin.

This was taught to Purandara by Subrahmaṇya.

Beginning:

पुरन्दर उवाच—

स्कन्ददेव सुरत्रातः शशिशेखरनन्दन ।
बहुश्रुतो बहुज्ञस्त्वं श्रुतं सर्वं महेश्वरात् ॥
ब्रह्महत्यानिवृत्तिर्मे केनोपायेन शाङ्करे ।
ब्रह्महत्यानिवृत्त्यर्थमुपायं वद मे प्रभो ॥
लोकापवाददुरितात्कीर्तिलक्ष्मीविनाशनात् ।
दारिद्र्यशीलदुरितवैदुष्यक्लेशकारणात् ॥
तनुत्यागो वरमिति भाति मे शिवनन्दन ।

स्कन्दः—

पाकशासन मा भैषीः सर्वं भद्रं भविष्यति ॥
सुरवन्दित देवेन्द्र त्वदिष्टञ्च जगद्धितम् ।

* * * *

शृणुष्वाष्टोत्तरशतं सहस्रेणैकगर्भितम् ।
स्तोत्रं वक्ष्ये विधानेन छन्दर्षिन्यासपूर्वकम् ॥

अस्य श्रीदत्तात्रेयाष्टोत्तरशतसहस्रनामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, गायत्र्यनुष्टुप् छन्दांसि, दत्तात्रेयपरमात्मा देवता, अवधूत इति बीजम्, योगीति शक्तिः, मोक्षदायक इति कीलकम्, दत्तात्रेयसिद्ध्यर्थे जपे विनियोगः । दत्तात्रेयाय ज्ञानात्मने अङ्गुष्ठाभ्यां नमः ।

* * * *

दत्तात्रेयः स्वयंव्यक्तः सर्वज्ञः पुरुषोत्तमः ।
अवधूतो हरिः कृष्णः केशवः क्लेशनाशनः
मुनिर्दिगम्बरो बालो हृषीकेशस्त्रिविक्रमः ।
दत्तश्च मदनश्शार्ङ्गी दान्तस्सर्वजनप्रियः ॥

End:

तत्त्वस्वरूपस्तत्त्वादिर्भ्राजिष्णुर्मोक्षदायकः ।
तृणीकृतजगद्भक्तनिदानः परमेश्वरः ॥
इत्येतानि मयोक्तानि दत्तात्रेयस्य योगिनः ।
पुरा सहस्रनामानि पठितानि विरिञ्चिना ॥

* * * *

सङ्ग्रामे वाप्यसङ्ग्रामे युद्धे जयति . . ॥

No. **8930.** दत्तात्रेयाष्टोत्तरशतनामस्तोत्रम्.

DATTĀTRĒYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 6387.

Complete.

Gives one hundred and eight names in praise of Dattātrēya.

Beginning:

अस्य श्रीदत्तात्रेयाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तात्रेयपरमात्मा देवता, आं बीजम्, श्रीं शक्तिः, ह्रीं कीलकम्, मम समस्तापन्निवारणार्थे श्रीमहालक्ष्मीसहितदत्तात्रेयपरमगुरुमूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

देवाय देवदत्ताय दत्तात्रेयाय योगिने ।
योगीश्वराय योगाय योगानन्दप्रदायिने ॥

End:

नमोऽनन्ताय शान्ताय कवये गुरवेऽपि च ।
इति श्रीदत्तात्रेयाष्टोत्तरशतनामस्मरणमात्रेण सर्वसिद्धिमवाप्नुयात् ॥

No. 8931. दत्तात्रेयाष्टोत्तरशतनामस्तोत्रम्.

DATTĀTRĒYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 12*a* of the MS. described under No. 6393.

Complete.

Same as the above.

No. 8932. दशावतारनामावलिः

DAŚĀVATĀRANĀMĀVALIḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 3546, wherein this has been omitted to be given in the list of other works.

Complete.

Gives the names of the ten Avatāras or incarnations of Viṣṇu.

Beginning:

मत्स्याय नमः । कूर्माय नमः । वराहाय नमः ।

End:

बलरामाय नमः । कृष्णाय नमः । कल्किने नमः ॥

No. 8933. नाममौक्तिकमाला.

NĀMAMAUKTIKAMĀLĀ.

Pages, 3. Lines, 10 on a page.

Begins on fol. 17*a* of the MS. described under No. 3877, wherein this has been given as Nāmamālā among the other works.

Complete.

A collection of 128 names of Viṣṇu by Yāmunācārya.

Beginning :

यत्पादाम्भोरुहध्यानविध्वस्ताशेषकिल्बिषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥
श्रीनाममौक्तिकैर्माला यामुनार्येण निर्मिता ।
ऋषिसु(शु)क्तिसमुद्भूतैर्निर्दोषैः श्रुतिसागरे ॥
श्रीमन्नारायणाद्रीश श्रीमन्नञ्जनशैलप ।
श्रीमद्वृषभशैलेन्द्र श्रीमत्सिंहनगाधिप ॥
श्रीशेषगोत्रभरण श्रीनिवासेति कीर्तये ।
अच्युतानन्त गोविन्द मुकुन्द गरुडध्वज ॥
जगदानन्दजनक जगज्जन्मादिकारण ।
नारायण जगन्नाथ शरणागतवत्सल ॥

End :

करीन्द्रवरदानन्त श्रीधर श्रीनिकेतन ।
निरवद्य परब्रह्मन् सर्वलोकपदाश्रय ॥
नाथसेव्यपदाम्भोज वकुलाभरणाश्रय ।
रामारामाभिरामाङ्ग रामकृष्णेति कीर्तये ॥
श्रीमद्वेङ्कटनाथमादिपुरुषं पूर्णं परं शाश्वतं
श्रीनाथं शरणागतार्तिहरणं नारायणं संश्रये ।
कृष्णं विष्णुमनन्तमच्युतमजं गोविन्दमिन्दीवर-
श्यामं नन्दकशङ्खचक्ररुचिरं ध्यायन् भजे कीर्तये ॥
येन तत्पठ्यते नाम्नामष्टाविंशोत्तरं शतम् ।
अनिष्टपक्षक्षपणमिष्टावाप्तिरवाप्यते ॥

No. **8934.** नारायणाष्टोत्तरशतनामस्तोत्रम्.

NĀRĀYAṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 3. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 78*a*. The other works herein are Viṣṇusahasranāmabhāṣya 1*a*, Āpastambadharmasūtra 64*a*, Nārayaṇavarma 79*b*.

Complete. From Brahmāṇḍapurāṇa.

Gives one hundred and eight names in praise of Nārāyaṇa *i.e.,* Viṣṇu. The authorship of this eulogy is attributed to Śēṣa or the serpent-god; and it is said to have been taught by Varāha to Dharaṇī (the goddess of earth). The repetition of these names is considered to absolve one from sins.

Beginning:

अस्य श्रीनारायणाष्टोत्तरशतदिव्यस्तोत्रमहामन्त्रस्य श्रीशेषभगवान् ऋषिः, श्रीनारायणः परमात्मा देवता, अनुष्टुप् छन्दः, समस्तपापक्षयद्वारा श्रीनारायणप्रीत्यर्थे विनियोगः ।

नारायणो नरश्शौरिश्चक्रपाणिर्जनार्दनः ।
वासुदेवो जगद्योनिर्वामनो ज्ञानपञ्जरः ॥
श्रीवल्लभो जगन्नाथश्चतुर्मूर्तिश्चतुर्भुजः ।
देवदेवो हृषीकेशश्शङ्करो गरुडध्वजः ॥

End:

निष्कलङ्को निराभासो निर्विकल्पो निरामयः ।
भक्तवश्यो महोदारः पुण्यकीर्तिः पुरातनः ॥
इति त्रैलोक्यनाथस्य विष्णुमूर्तेर्वरानने ।
नाम्नामष्टशतं चैवमशेषेण प्रकीर्तितम् ॥
असितजलदवर्णं वर्ण्यमौ(र्णनो)पाधिहीनं
निखिलनिगमवेद्यं गुह्यमेकान्तसूक्ष्मम् ।
अमलममलदृष्ट्या देवि पश्यन्ति ये मां
हृदयकमलमध्ये देवि मुक्ता भवन्ति ॥

Colophon:

